International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 289-291
© 2023 IJSR
www.anantaajournal.com
Received: 13-01-2023
Accepted: 16-02-2023

**डॉ. लक्ष्मीनारायणबेहेरा**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
श्रीजगन्नाशसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**डॉ. लक्ष्मीनारायणबेहेरा**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
श्रीजगन्नाशसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा, भारत

# सार-परिसंख्यालङ्कारयोः शैक्षिकमहत्त्वम्

**डॉ. लक्ष्मीनारायणबेहेरा**

**सारांश**
काव्यशास्त्रे प्रतिपादितेषु विविधालङ्कारेषु 'सार-परिसंख्या' इत्यनयोः शिक्षाशास्त्रीयमहत्त्वमत्र प्रतिपादितम्। वस्तूनाम् उत्कर्षतायाः क्रमिकविवेचनम् एव सारालङ्कारः। पुनश्च प्रश्नोत्तरविधिसन्दर्भितः परिसंख्यालङ्कारः। सारालङ्कारे वस्तूनां प्रतिपादनगतशैली अधिगमाध्यापनसन्दर्भे महदुपकरोति। तथैव शिक्षाशास्त्रे प्रमुखरूपेण समादृतस्य प्रश्नोत्तरविधेः परिपूरकतां साधयति परिसंख्यालङ्कारः। संस्कृतकाव्यशास्त्रपरम्परायाम् अन्तर्निहितानां शैक्षिकतत्त्वानामाविष्करणसन्दर्भित-मिदं शोधकार्यम्।

**कूटशब्द:** सारः, परिसंख्या, बालमनोविज्ञानम्, शिक्षणविधिः

## प्रस्तावना
अध्यापने विषयवस्तूनाम् उपस्थापनं स्पष्टीकरणं च विध्यनुसारमेव भवति। गद्य-पद्यादीनामध्ययनावसरे विषयवस्तूनः स्पष्टीकरणे काठिन्यनिवारणव्याख्या-नादयः नैके उपायाः अवलम्बन्ते। तत्र क्रमबद्धतायाः अप्यनुसरणं भवति। सर्वोपरि वक्तुं शक्यते यत् अध्यापनं व्यापकं विस्तृतं बहुतथ्यसम्बलितं च वर्त्तते। एतस्मादेव कारणात् कदाचित् छात्राः तस्यादध्याप्यमाणविषयात् मुख्यविन्दूनां चयने अन्वेषणे वा सन्दिग्धाः असमर्थाश्च भवन्ति। एतन्निराकरणाय व्याख्यानस्यान्तिमे सारकथनस्य प्रासङ्गिकता-मनुभवन्ति अध्यापकाः। तस्यैव सारकथनस्य किञ्चन प्रतिरूपमलङ्कारशास्त्रे अप्यस्तीति अनुसन्धात्रा अनुभूतम्।

## 'सारः' इत्यस्यालङ्कारस्य शैक्षिकमहत्वम्
काव्यशास्त्रे तु अलङ्कारत्वेन सारलङ्कार कश्चनः विशिष्टालङ्कारः। तत्र व्यापकविषयेभ्यः सारांशरूपस्य क्रमबद्धचयनरीतेरनुसरणं भवति। एषा प्रक्रिया तु गद्यपद्धाध्यापने सारांशकथनप्रक्रियावत् प्रतिभासते। प्रति, स्थूलतः सूक्ष्मं प्रति इत्यनयोः सिद्धान्तयोः अनुसरणं भवति।
शिक्षाशास्त्रे सारकथनस्य परिसीमा-उद्देश्य तात्पर्यादयः सारालङ्कारतः भिन्नाः। शिक्षाशास्त्रप्रतिपादितस्य सारांशकथनस्य अंशमात्रत्वेन सारालङ्कारस्य प्रक्रिया वर्त्ततेति अनुसन्धात्रा ज्ञातम्।

सारालङ्कारस्य लक्षणानुरूपकथनं शिक्षाशास्त्रे अपि परिलक्ष्यते। यथा-

> 'Summary teaches students how to take a large selection of text and reduce it to the main points for more concise understanding.'

सारालङ्कारस्य लक्षणम् यथा-

'उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते।'[1]

यत्र उत्तरोत्तरं वस्तूनाम् उत्कर्षता प्रतिपाद्यते तत्र सारालङ्कारः। कासुचित् सारांशकथनप्रक्रियासु एतस्यैव सिद्धान्तस्यानुसरणं भवतीति अध्येत्रा अनुसन्धाना-दवगतम्।
अन्यच्च वैशिष्ट्यमेतस्यालङ्कारस्य वर्त्तते यत् सारालङ्कारे अवबोधनप्रक्रिया सरला स्पष्टा च। वस्तूनाम् प्रतिपादनसमये संक्षिप्तवाक्यानां समाहारः परिलक्ष्यते। संक्षिप्तत्वात् छात्राः अवबोधने क्लिष्टतां नानुभवन्ति। दीर्घवाक्यतः अर्थावगमनं तथा सरलं न भवति यथा सूक्ष्मवाक्येभ्यः भवति। सारल्यता क्लिष्टरहिता असन्दिग्धता चेत्यादयः गुणाः शिक्षाशास्त्रसिद्धान्तानुकूलाः एव भवन्ति।
इदमप्यन्यत् शैक्षिकमहत्वं यदत्र सारालङ्कारे बालमनोविज्ञानसिद्धान्तस्या-नुसरणं कृतमस्ति। यतो हि बालमनोविज्ञानदृष्ट्या विषयवस्तूनि सरलानि, अवबोधनसुलभानि, क्रमबद्धानि च भवेयुः। विविधानामुदाहरणानामनुध्यानेन ज्ञायते यत् एषः सारालङ्कारः बालशिक्षायै पूर्णतः समर्थः।
पुनश्च सारालङ्कारसिद्धान्तानुकूलाः बालबोधनयोग्याः बह्वः नीतिश्लोकाः संस्कृसाहित्ये विरचिताः सन्ति। यथा-

नरत्त्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं यत्र शक्तिस्तत्र सुदुर्लभा।।[2]

एतेषां नीतिपरकश्लोकानां स्वरूपं तु सारालङ्कारवत् भवति। छात्राः एतैः श्लोकैः सरलया रीत्या नीतिशिक्षां लभन्ते इति अन्यदेकं वैशिष्ट्यम्।
सारालङ्कारस्य प्रक्रिया सरला वर्त्ततेति कारणात् कण्ठस्थीकरणे अपि छात्राः क्लिष्टतां नानुभवन्ति। रूचिशीलाः सन्तः कण्ठस्थीकरणं विधाय, अर्थं च ज्ञात्वा चिरकालपर्यन्तं स्मृतौ अवधारणे समर्थाः भवन्ति छात्राः।
अनुसन्धात्रा अप्यनुभूतं यत् सारालङ्कारसंयुक्ताः श्लोकाः मानसपटले यथा स्थायित्वं साधयन्ति तथा नान्याः यथोदाहरणम्-

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्।।[3]

1. सा.द.दशमपरिच्छेदः, का.-७८
2. साहित्यदर्पणः, प्रथमपरिच्छेदः
3. संस्कृतसाहित्येतिहासः, हरेकृष्णशतपथी

स्नातक-स्नातकोत्तरस्तरे न कोऽपि छात्रः वर्त्तते यदिदं पद्यं तेन न स्मर्यते। एतस्य प्रमुखं कारणं वर्त्तते उत्कर्षताप्रतिपादने क्रमबद्धता, भाषागतसरलता, असन्दिग्घता, सरलता, रूचिपूर्णता च।

**प्रश्नोत्तरविधिसन्दर्भितः परिसंख्यालङ्कारः**
शिक्षाशास्त्रपरम्परायां प्रचलितेषु बहुप्रयुक्तेषु विधिषु प्रश्नोत्तरविधिः अन्यतमः। कक्षाध्यापनवेलायां शिक्षक-छात्रयोर्मध्ये प्रश्नकरणम् उत्तरग्रहणं चेति प्रक्रिया सर्वदैव प्रचलति। शिक्षकेनोत्थापितस्य प्रश्नस्य उत्तरप्रदानार्थं छात्राः प्रयतन्ते। कदाचिच्च छात्रैः पृष्टाः प्रश्नाः शिक्षकेण समाधिताः भवन्ति। अध्यापनाधिगमप्रक्रियां प्रभावपूर्णं विधातुं प्रश्नोत्तरविधिः कश्चन प्रकृष्टः विधिः वर्त्तते इति शिक्षाविदः वदन्ति। अध्यापनवेलायां छात्राभिव्यक्तिक्षमताम् अभिवर्द्धयितुं वैयक्तिकयोग्यतां परीक्षितुम्, उपस्थापनशैलीं विकासयितुं परिमार्जयितुं च अस्य प्रासङ्गिकता वर्त्तते।
संस्कृतवाङ्मयमन्थनेन ज्ञायते यत् विविधेषु शास्त्रविशेषेषु प्रश्नोत्तरविधेः उपस्थितिं वयं द्रष्टुं शक्नुमः। यद्यपि पाश्चात्यशिक्षाविदः 'सक्रेतिस्' एव प्रश्नोत्तरविधेरा-विष्कारकः आसीदिति वदन्ति तथापि भारतीयशिक्षाविदः तन्नाङ्गीकुर्वन्ति। यतो हि वैदिककालादरभ्य संस्कृतजगति प्रश्नोत्तरविधेः प्रयोगबाहुल्यं परिदृश्यते। संस्कृतकाव्य-शास्त्रजगति परिसंख्यालङ्कारे उत्तरालङ्कारे च एतस्य प्रश्नोत्तरविधेः प्रासङ्गिकता परिदृश्यते। प्रश्नोत्तरविधिः छात्रान् अध्यापकान् च क्रियाशीलान् करोतीति अन्यदेक-मेतस्य वैशिष्ट्यम्।
परिसंख्यालङ्कारस्योदाहरणं यथा-

किं ? भूषणं सुदृढमत्र यशो न रत्नम्,
किं कार्यमार्यचरितं सुकृतं, न दोषः।
किं चक्षुरप्रतिहतं ? धिषणा न नेत्रं,
जानासि कस्त्वदपरः सदसद्विवेकम्।।[4]

उदाहरणेऽस्मिन् किं भूषणं, किं करणीयं, किं चक्षुरप्रतिहतं, किं सदसद्विवेकं जानासि, इत्येताः प्रश्नाः प्रत्येकपादारम्भे उत्थापिताः। प्रत्येकप्रश्नस्यानन्तरं तदुत्तराण्यपि प्रतिपादितानि। प्रश्नोत्तरप्रक्रियायाः उत्कृष्टतमम् इदमुदाहरणम्। परिसंख्यालङ्कारस्य लक्षणमित्थं वर्त्तते-


प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत्
तादृगन्धव्यपहोश्चेच्छब्द अर्थोऽथवा तदा।।
परिसंख्या........................................।[5]

4. सा.द.दशमः परिच्छेदः
5. सा.द.दशमपरिच्छेदः, कारिका-८१

पुनश्च-

किञ्चित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते।
तादृगन्धव्यपोहाय परिसंख्या तु सा स्मृता।।6

तात्पर्यमिदं यत् प्रश्नाः अपृष्टाः भवन्तु नाम, यदि उत्तराणि विश्लिस्य प्रश्नानुमानं भवति तत्र परिसंख्या। अन्यत्र च पृष्टानां प्रश्नानां तदनुरूपमुत्तरप्रदानम् अपि परिसंख्येति। काव्यप्रकाशादिषु ग्रन्थेषु परिसंख्यायाः विविधभेदाः प्रतिपादिताः। यथा-




परिसंख्यालङ्कारस्य शैक्षिकमहत्त्वं वर्त्तते यत् अत्र प्रश्नोत्तराणि सहैव उपस्थाप्यन्ते। फलतः छात्रेषु वस्तुनिष्ठज्ञानं तत्क्षणादेव समायाति। प्रश्नोत्तरमाध्यम-त्वात् ज्ञानस्य स्पष्टीकरणमपि अक्लेशेन भवति। न केवलम् अलङ्ककारशिक्षणे अपि तु नीतिशिक्षासम्बलितानि परिसंख्यालङ्कारपरिपूरकानि विविधानि उदाहरणानि प्रारम्भिककक्षायाः छात्राणां कृते संस्कृतपाठ्यक्रमे सन्निविष्टानि भवन्ति। यथोदाहरणम्-

कोऽन्धो योऽकार्यरतः को बधिरो यः श्रृणोति नैतानि।
को मूको यः काले प्रियाणि वक्तु नं जानाति।।7

यथा वा-

कुत्र विधेयो यत्नो विद्यारम्भे सदौषधे दाने।
अवधीरणा क्व कार्या खलपरयोषित्परधनेषु।।8

स्वयमेव-

किं क्रूरं स्त्रीहृदयं किं गृहिणः प्रियहिताय दारगुणाः
कः कामः संकल्पः किं दुष्करसाधनं प्रज्ञा।।9

इत्थं काव्यशास्त्रपरम्परायां परिसंख्यालङ्कारस्य बहूनि उदाहरणानि सम्प्राप्यन्ते यानि तु शिक्षाशास्त्रीयमार्गनुसरन्ति।

**सन्दर्भग्रन्थाः**

1. काव्यप्रकाशः व्याख्याकारः पं.रघुनाथचतुर्वेदी, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, द्वितीयसंस्करणम्, २००३
2. साहित्यदर्पणः, व्याख्याकरः शेशराजशर्मा रेश्मी, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी-१९९४
3. सुभाषितरत्नभाण्डागारः, संग्राहकः काशीनाथशर्मा, तृतीयसंस्करणम्
4. शिक्षामनोविज्ञानम्, पी.डी.पाठक, विनोदपुस्तकमन्दिरम्, आग्रा.-२-१९८८
5. वाङ्मयम्, त्रिवेणिकासंस्कृतपरिषद्, इलाहावाद, शोधपत्रिका-२०१५

6. का.प्र.दशमोल्लासः, कारिका-३३
7. सुभाषितश्लोकभाण्डारः
8. सुभाषितश्लोकभाण्डारः
9. सुभाषितश्लोकभाण्डारः